# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - ओक्टोबर् - २०१९ (New)

| | | |
|---|---|---|
| कक्षा- आचार्य-२(SEM-3) | प्रश्नपत्रम् – ३ | गुणाः - ७० |
| विषयः - सर्वदर्शनम् | CC- 5.3.8 | समयः – ३ तः ६ |
| दिनाङ्कः – ११-१०-२०१९ | ग्रन्थः – न्यायदर्शनम्, वात्स्यायनभाष्यसहितम् | |

### विभागः -१

**प्रश्नः -१ निम्नलिखितयोः एकस्य समाधानं यथाभाष्यं लिखत।** ०५

(१) 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' ।

(२) 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्'।

**प्रश्नः -२ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं देयम्।** १०

(१) षोडशपदार्थान् यथाभाष्यं व्याख्यात।

(२) 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तराऽपाये तदनन्तरापायादपवर्गः' यथाभाष्यं विवृणुत।

### विभागः -२

**प्रश्नः -३ निम्नलिखितयोः द्वयोरेकस्य यथाभाष्यमुत्तरं देयम् ।** ०५

(१) 'अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतोदृष्टं च' ।

(२) 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्' व्याख्यात।

**प्रश्नः -४ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्' सभाष्यं वर्णयत।

(२) 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षं' सभाष्यं व्याख्यात।

### विभागः -३

**प्रश्नः -५ निम्नलिखितयोः द्वयोरेकस्य सभाष्यमुत्तरं देयम्।** ०५

(१) प्रयोजनदृष्टान्तौ यथाभाष्यं व्याख्यात।

(२) सिद्धान्तभेदान् यथाग्रन्थं व्याख्यात।

**प्रश्नः -६ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) 'तदत्यन्तविमोक्षोऽपवर्गः' सूत्रमिदं सभाष्यं विवृणुत।

(२) 'समानाऽनेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यऽव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः' विवृणुत।

## विभागः - ४

**प्रश्नः -७ निम्नलिखितयोः एकस्य उत्तरं सभाष्यं देयम् ।** ०५

(१) विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः।

(२) अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः।

**प्रश्नः -८ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) 'प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः' व्याख्यात।

(२) उदाहरणनिगमनयोः वैशिष्ट्यं सभाष्यं व्याख्यात।

**प्रश्नः -९ अधोलिखितेषु दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** १०

(१) किं नाम तत्त्वम्?

(२) न्यायदर्शनस्य प्रवर्तकः कः?

(३) चत्वार्यर्थपदानि कानि?

(४) कानि भूतानि?

(५) पञ्चावयवान्तर्गत 'हेतुः' कुत्र अन्तर्भवति?

(६) उपलब्धिसाधनानि कानि?

(७) अस्य शास्त्रस्य प्रवृत्तिः कतिविधा?

(८) इच्छा..........आत्मनो लिङ्गम्। पूरयत।

(९) शब्दः कतिविधः? के च ते?

(१०) किं नाम शरीरम्?

(११) हेतोः लक्षणं किम्?

(१२) न्यायभाष्यस्य कर्ता कः?

(१३) के दोषाः?

(१४) किं नाम दुःखम्?

(१५) एकस्मिन्नध्याये आह्निकानि कति सन्ति?

***

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - ओक्टोम्बर् - २०१९ (New)

| | | |
|---|---|---|
| कक्षा- आचार्य-२(SEM-3) | प्रश्नपत्रम् – ३ | गुणाः - ७० |
| विषयः - सर्वदर्शनम् | CC- 5.3.8 | समयः - |
| दिनाङ्कः - | ग्रन्थः – न्यायदर्शनम्, वात्स्यायनभाष्यसहितम् | |

### प्रश्नः - ७

### समाधानानि

१. सत् सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति।
२. महर्षिगौतमः।
३. हेयं तस्य निवर्तकं हानमात्यन्तिकं तस्योपायोऽधिगन्तव्य इति।
४. पृथिव्यप्तेजोवाय्वाकाशानि पञ्चभूतानि।
५. अनुमाने।
६. प्रमाणानि।
७. त्रिविधा चास्य प्रवृत्तिः।
८. इच्छाद्वेषप्रयत्नसुखदुःखान्यात्मनो लिङ्गम्।
९. शब्दः द्विविधः, दृष्टाऽदृष्टार्थभेदात्।
१०. चेष्टेन्द्रियाश्रयः शरीरम्।
११. उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः।
१२. वात्स्यायनः।
१३. प्रवर्तनालक्षणा दोषाः।
१४. बाधनालक्षणं दुःखम्।
१५. आह्निकद्वयम्।